"अथाभ्यषिच्यत क्षिप्रं विप्रैरेत्य यशस्करः ।
क्ष्माभृतिः प्रौढ़सामर्थ्यैः सानुमानिव तोयदैः ॥"

क्ष्मापः, पुं, ( क्ष्मां पाति रक्षतीति । क्ष्मा+पा+कः । ) राजा । यथा,—
"आमयार्त्तिरिपुत्रासक्षुदाद्यौ इश्वैकतान् ।
लब्धोदया ह्रीभयेन क्ष्मापा घ्नन्त्यनुयायिनः ॥"
इति राजतरङ्गिण्याम् । ५ । ३१६ ॥

क्ष्मापालः, पुं, ( क्ष्मां पालयतीति । क्ष्मा+पाल्+णिच्+अण् । क्ष्मायाः पालो वा । ) राजा । यथा, राजतरङ्गिण्याम् । ५ । ३२४ ।
"न के लोभं समुत्पाद्य जिह्वया स्निग्धदीर्घया ।
पिपीलिका इव ग्रस्ताः क्ष्मापालैः शल्यकैरिव ॥"

क्ष्माभुक् [ ज्, ] पुं, ( क्ष्मां पृथ्वीं भुनक्ति उपभुनक्ति इत्यर्थः । क्ष्मा+भुज्+क्विप् । कुत्वं च । ) राजा । इत्यमरः । २ । ८ । १ ॥ (यथा, राजतरङ्गिण्याम् । ५ । ५५ ।
"तत्रस्थाः क्ष्माभुजा पृष्टास्तन्निवेदनकारणम् ।
व्यजिज्ञपन् क्षितिन्यस्तजानुप्राञ्जलयस्ततः ॥")

क्ष्माभृत्, पुं, ( क्ष्मां पृथ्वीं बिभर्त्ति । क्ष्मा+भृ+क्विप् तुगागमश्च । ) राजा । ( यथा, पञ्चतन्त्रे । १ । १६६ ।
"देशानामुपरि क्ष्माभृदातुराणां चिकित्सकाः ।
वणिजो ग्राहकाणाञ्च मूर्खाणामपि पण्डिताः ॥")
पर्व्वतः । इत्यमरः । २ । ८ । १ ॥ (यथा, राजेन्द्रकर्णपूरे । ६७ ।
"कान्तारेषु च काननेषु च सरित्तीरेषु च
क्ष्माभृता-
सुत्सङ्गेषु च पत्तनेषु च सरिद्भर्त्तुस्तटान्तेषु च ॥")

क्ष्माय, ई ङ विधूनने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) पवर्गशेषयुक्तः । क्षादिः । विधूननमिति विधून्यतेऽसाविति कर्म्मणि घञि विधूनः सकम्पः ततो विधून इवाचरतीति क्वौ कृते अनटि रूपम् । कम्पनमित्यर्थः । ई, क्ष्मातः । ङ, क्ष्मायते वृक्षः । (तथाच, भट्टिः । १४ । २१ ।
"उल्का ददृशिरे दीप्ता रुरुवुश्चाशिवं शिवाः ।
चक्ष्माये च मही रामः शशङ्के चाशुभागमम् ॥")
क्ष्मायते कम्पते त्वङ्गत्येजतीत्त्यं च वेपते इति कम्पार्थे भट्टमल्लोऽपि । रमानाथस्तु विधूननशब्दस्येणन्ताद्युत्पत्तेः सकर्म्मकोऽयं इति प्रतीमः । प्रयोगस्त्वन्यथा दृश्यते इत्याह । इति दुर्गादासः ॥

क्ष्मायितः, त्रि, ( क्ष्माय+इतच् । ) कम्पितः । इति व्याकरणम् ॥

क्ष्मायिता, [ ऋ ] त्रि, ( क्ष्माय+तृच्प्रत्ययः । ) कम्पकः । इति व्याकरणम् ॥

क्ष्मील, निमेषे । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सेट् । ) निमेषः पक्ष्मभिश्चक्षुष आवरणम् । क्ष्मीलति चक्षुः पक्ष्मभिरावृतं स्यादित्यर्थः । इति दुर्गादासः ॥

क्ष्विड़, ऌ आ ङ ञि स्नेहे । मोचे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-मोचे सकं-सेट् ।) वकारयुक्तः । ऌ, अक्ष्विड़त् । आ, क्ष्विड़ितं क्ष्विण्णं तेन । ङ, क्ष्वेड़ते । ञि, क्ष्विण्णोऽस्ति । स्नेहः स्निग्धीभावः । मोचे क्ष्वेड़ते तिलः तैलं मुञ्चतीत्यर्थः । इति दुर्गादासः ॥

क्ष्विणः, त्रि, ( क्ष्विद्+क्तः । ) मुक्तः । स्निग्धः । इति व्याकरणम् ॥

क्ष्विद, आ ञि कूजने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) आ, क्ष्वेदितं क्ष्विण्णं तेन । ञि, क्ष्विण्णोऽस्ति । मूर्द्धन्यवर्गतृतीयान्तोऽयमित्येके । इति दुर्गादासः ॥

क्ष्विद, इर् य आ मोचे । स्नेहे । इति कविकल्पद्रुमः ॥ ( दिवां-परं-अकं-मोचे तु सकं-सेट् । ) इर्, अक्ष्विदत् अक्ष्वेदीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । य, क्ष्विद्यति । आ, क्ष्वेदितं क्ष्विण्णं तेन । इति दुर्गादासः ॥

क्ष्विद, ऌ आ ङ ञि मोचे । स्नेहे । इति कविकल्पद्रुमः ॥ ( भ्वां-आत्मं-सकं-स्नेहे तु अकं-सेट् । ) एतदाद्यास्त्रयो वकारयुक्ताः क्षाद्याः । ऌ, अक्ष्विदत् । आ, क्ष्वेदितं क्ष्विण्णं तेन । ङ, क्ष्वेदते तिलः तैलं मुञ्चतीर्थः । ञि, क्ष्विण्णोऽस्ति । स्नेहः स्निग्धीभावः । इति दुर्गादासः ॥

क्ष्वेड़ं, क्ली, ( क्ष्विड़+घञ् । ) लोहितार्कपर्णफलम् । घोषापुष्पम् । इति मेदिनी । ड़े । ६ ॥

क्ष्वेड़ः, पुं, ( क्ष्विड़+भावादौ घञ् । क्ष्वेड़ते इति अच् वा ।) ध्वनिः । कर्णामयः । विषम् । इति मेदिनी । ड़े । ५ ॥ (यथा, आनन्दलहर्य्याम् । २८ ।
"करालं यत् क्ष्वेड़ं कवलितवतः कालकलना
न शम्भोस्तन्मूलं जननि तव ताड़ाङ्कमहिमा ॥")
पीतघोषावृक्षः । इति रत्नमाला ॥ * ॥ क्ष्वेड़रोगस्य निदानादि कर्णरोगशब्दे द्रष्टव्यम् ॥

क्ष्वेड़ः, त्रि, ( क्ष्विड़+कर्म्मणि घञ् । ) दुरासदः । कुटिलः । इति मेदिनी । ड़े । ६ ॥

क्ष्वेड़नं, क्ली, ( क्ष्विड़+भावे ल्युट् । ) मोचनम् । त्यागः । यथा, महाभारते । ३ । १७८ । २६ ।
"त्रासनं सर्व्वभूतानां कालान्तकयमोपमम् ।
निश्वासक्ष्वेड़नादेव भर्त्सयन्तमिव स्थितम् ॥"

क्ष्वेड़ा, स्त्री, ( क्ष्विड़+घञ्+टाप् च । ) वंशशलाका । सिंहनादः । इति मेदिनी । ड़े । ५ ॥ (स तु लोकस्य शब्दविशेषः । यथा, वक्रोक्तिपञ्चाशिकायाम् । ३६ ।
"एषा सागरसङ्गताभिमततां याता न मे कर्हिचित्
मुग्धे कण्ठभुवं ब्रवीषि मम किं सक्ष्वेड़तामीदृशीम् ।
क्ष्वेड़ाराव इहोचितस्तव गणव्रातैः सह क्रीड़तो
युष्मान्नीलगलोऽवतादिति गिरा गौर्य्या कृतो-
ऽनुत्तरः ॥"
"सागरसङ्गतेति । सागरेण समुद्रेण सङ्गता । अर्थाद्गङ्गा । उत्तरे तु सेति सर्व्वनामपदम् । गरो विषम् । तदाह सक्ष्वेड़ेति । क्ष्वेड़ेन विषेण क्ष्वेड़या शब्दविशेषेण च सक्ष्वेड़म् । क्ष्वेड़ं विषम् । क्ष्वेड़ा जनस्य शब्दविशेषः ॥" इति तट्टीका ॥) कोषातकी । इति राजनिर्घण्टः ॥

क्ष्वेड़ितं, क्ली, (क्ष्विड़्+भावे क्तः ।) सिंहनादः । इत्यमरः । ३ । ५ । ३४ ॥ ( यथा, महाभारते । १ । ६८ । ६ ।
"नानायुधधरैश्चापि नानावेशधरैस्तथा ।
हेषितस्वनमिश्रैश्च क्ष्वेड़ितास्फोटितस्वनैः ।
आसीत् किलकिलाशब्दस्तस्मिन् गच्छति
पार्थिवे ॥" )

क्ष्वेल, ऋ चालगत्योः । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-गतौ तु सकं-सेट् । ) वकारयुक्तः । क्षादिः । ऋ, अचिक्ष्वेलत् । चालः कम्पः । चालः कैश्चिन्न मन्यते । इति दुर्गादासः ॥ (क्रीड़ायामिति केचित् । यथा, रामायणे । ५ । १० । १३ ।
"आस्फोटननिनादांश्च बालानां क्ष्वेलतां तथा ॥")

क्ष्वेलिका, स्त्री, (क्ष्वेला+स्वार्थे कन् अत इत्वञ्च ।) क्रीड़ा । यथा, श्रीभागवते । ५ । ८ । १८ ।
"क्ष्वेलिकायां मां मृषा समाधिना आमीलितदृशं प्रेमसंरम्भेण चकितचकित आगत्य पृषदपरुषविषाणाग्रेण लुठति ।" "सम्भवति चेतदित्याह । क्ष्वेलिकायां क्रीड़ायां मृषा यः समाधिस्तेनामीलिते दृशौ येन तं मां प्रेमसंरम्भेण प्रणयकोपेन पृषत्जलविन्दुस्तद्वदपरुषेण विषाणाग्रेण लुठति संघट्टयति ।" इति तट्टीकायां श्रीधरस्वामी ॥

क्ष्वेली, स्त्री, ( क्ष्वेल+गौरादित्वात् ङीष् । ) क्रीड़ा । यथा, श्रीभागवते । १० । २९ । ४६ ।
"बाहुप्रसारपरिरम्भकरालकोरु-
नीविस्तनालभननर्म्मनखाग्रपातैः ।
क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणा-
मुत्तम्भयन् रतिपतिं रमयाञ्चकार ॥"
"बाहुप्रसारश्च परिरम्भश्च करालकादीनामालभनं स्पर्शश्च नर्म्म परिहासश्च नखाग्रपातश्च तैः । क्ष्वेल्या क्रीड़या च अवलोकैश्च हसितैश्च कामं तासां उद्दीपयन् ता रमयामास ।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥ अत्र क्ष्वेल्यमिति प्रमादात् केनचिल्लिखितम् ॥